प्राञ्चः । 'स्वरितो वाऽनुदात्ते पदादौ' (८.२.६/३६५९) इत्ययमेकादेशः उदात्तः स्वरितो वा । पराङ्, पराञ्चौ, [1]पराञ्चः (तै.सं. ३.१.१०.३) । अनिगन्तः इति किम् ? प्रत्यङ्, प्रत्यञ्चौ, प्रत्यञ्चः । कृदुत्तरपदप्रकृतिस्वर इह भवति । [2]वप्रत्यये इति किम् ? उदञ्चनः । चोरनिगन्तोऽञ्चतौ वप्रत्ययः इत्येव स्वरो भवति विप्रतिषेधेन । पराचः । पराचा ॥

## न्यधी च । (५३/३७८७)

नि अधि इत्येतौ चाञ्चतौ वप्रत्यये परतः प्रकृतिस्वरौ भवतः । न्यङ्, न्यञ्चौ, न्यञ्चः । 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (८.२.४/३६५७) इत्यञ्चतेरकारः स्वरितः । अध्यङ्, अध्यञ्चौ, अध्यञ्चः । अधीचः । अधीचा[3] ॥

## ईषदन्यतरस्याम् । (५४/३७८८)

ईषत् इत्येतत् पूर्वपदम् अन्यतरस्यां प्रकृतिस्वरं भवति । ईषत्कडारः, ईषत्कडारः । [4]ईषत्पिङ्गलः, ईषत्पिङ्गलः । ईषत् इत्ययमन्तोदात्तः । ईषद्भेदः इत्येवमादौ कृत्स्वर एव भवति ॥

## हिरण्यपरिमाणं धने । (५५/३७८९)

हिरण्यपरिमाणवाचि पूर्वपदं धनशब्दे उत्तरपदेऽन्यतरस्यां प्रकृतिस्वरं भवति । द्विसुवर्णधनम्, द्विसुवर्णधनम् । द्वौ सुवर्णौ परिमाणमस्य द्विसुवर्णम्, तदेव धनमिति कर्मधारयः । बहुव्रीहावपि परत्वाद् विकल्प एव भवति । द्विसुवर्णधनः, द्विसुवर्णधनः । हिरण्यग्रहणम् किम् ? प्रस्थधनम् । [5]परिमाणग्रहणं किम् ? काञ्चनधनम् । धने इति किम् ? निष्कमाला ॥

## प्रथमोऽचिरोपसम्पत्तौ । (५६/३७९०)

प्रथमशब्दः पूर्वपदमचिरोपसम्पत्तौ गम्यमानायामन्यतरस्यां प्रकृतिस्वरं भवति । अचिरोपसम्पत्तिः [6]अचिरोपश्लेषः, अभिनवत्वम् । प्रथमवैयाकरणः, प्रथमवैयाकरणः । [7]अभिनववैयाकरणः, [8]सम्प्रति व्याकरणमध्येतुं प्रवृत्तः इत्यर्थः । प्रथमशब्दः 'प्रथेरमच्' (उ. ७५७) इति चित्त्वादन्तोदात्तः । अचिरोपसम्पत्तौ इति किम् ? प्रथमवैयाकरणः । वैयाकरणानामाद्यो मुख्यो वा यः स नित्योऽन्तोदात्तः एव[9] ॥

---

1. पराञ्चः नास्ति फ. 2. प्रत्यये इति ह. 3. अधिराद्युदात्तः इत्यधिकम् ह. 4. ईषत्पिङ्गलः नास्ति फ. 5. हिरण्यपरिमाणग्रहणं किम् ? काञ्चनधनः ह. 6 अचिरोपसंश्लेषः क.ङ.ग.फ. 7. अभिनववैयाकरणः नास्ति फ. 8. स तु इत्यधिकम् फ, संप्रति–अन्तोदात्तः नास्ति क. 9. भवति इत्यधिकम् फ.